चेपसितान् लोके सा तेन सर्वमङ्गला” देवीपु० ४५ अ० ।

**सर्वमय** त्रि० सर्वात्मकः मयट् । १सर्वात्मके २परमेश्वरे पु० ।

**सर्वमूल्य** न० ६त० । कपर्द्दके त्रिका० ।

**सर्वमूषक** पु० सर्वं मुष्णाति मुष-ण्वुल् पृषो० । काले हेमच० ।

**सर्वरस** पु० सर्वो रसमयः । (धुना) १शालरसे अमरः ७व० । २वीणादिवाद्ये मेदि० । ३पण्डिते शब्दच० । कर्म० । ४लवणे रसे । सर्वाणि रसयति रस-अण् । ५परमेश्वरे सैन्धवघनवत् तस्य सर्वत आनन्दमयत्वात् तथात्वम् ।

**सर्वरसोत्तम** पु० सर्वेषु रसेषु उत्तमः । लवणे रसे हेमच० ।

**सर्वरात्र** पु० सर्वा रात्रिः अच् समा० । “रात्राह्नाहाः पुंसीति” पा० पुंस्त्वम् । सकलरात्रौ सि०कौ० । [दिरयम् ।

**सर्वरी** स्त्री सृ-वनिप् ङीप् र च । रात्रौ धरणिः तालव्या-

**सर्वर्त्तुपरिवर्त्त** पु० सर्वर्त्तूनां परिवर्त्तो यत्र । वत्सरे जटा० ।

**सर्वला(ली)** स्त्री सर्वं लाति ला-क वा गौरा० ङीष् । तोमरास्त्रे अमरः ।

**सर्वलिङ्गिन्** पु० सर्वेषां लिङ्गानि सन्त्यस्य इनि । वेदविरुद्धाचारिणां बौद्धादीनां लिङ्गवत्सु पाषण्डेषु अमरः ।

**सर्वलोह** पु० सर्वः लोहमयोऽवयवो यस्य । लौहमये बाणे हेमच० । [गाम्भारीवृक्षे जटा० ।

**सर्ववर्णिका** स्त्री सर्वं वर्णयति वर्ण-ण्वुल् अत इत्त्वम् ।

**सर्वविद्** पु० सर्वं वेत्ति विद-क्विप् । १परमेश्वरे २सर्वज्ञातरि त्रि० ।

**सर्ववैद** पु० सर्वान् वेदान् अधीते उक्था० ठक् । “सर्वादेः सादेश्च लुक् वक्तव्यः” वार्त्ति० तस्य लुक् । १सर्ववेदाध्ययनकर्त्तरि । सर्वं वेत्ति विद-अण् उप० । २सर्वज्ञे त्रि० ।

**सर्ववेदस्** पु० सर्वाणि धनानि वेदयते लम्भयति पात्राय दक्षिणार्थं ददाति विद-लाभे णिच्-असि । सर्वस्वदक्षिणकविश्वजिन्नामकादियागकर्त्तरि अमरः ।

**सर्ववेदस** न० सर्वं वेदः स्वं गृहे विद्यमानं धनं नि० अच् समा० । सर्वस्वे गृहे विद्यमाने सर्वधने तच्च विश्वजिद्यागे दक्षिणात्वेन विहितम् । “सहस्रं सर्ववेदसं विश्वजितः” कात्या०श्रौ० २२।१।८ सहस्रसर्ववेदसयोर्विश्वजिति विकल्पः । सर्ववेदसपक्षे इदमुच्यते । “ज्येष्ठं पुत्रमपभज्य भूमिशूद्रवर्जं योगाविशेषात् सर्वेषाम्” सू० । “ज्येष्ठपुत्रस्य विभागं दत्त्वा भूमिशूद्रवर्जं ददाति कुत एतत् सर्वमनुष्याणां हि भूम्या योगोऽविशिष्टः धारणचङ्क्रमणद्वारेण, शूद्रस्य च शुश्रूषोपनततेति” कर्कः “भूमेस्तावद्धारणशयनासनचङ्क्रमणादिसम्बन्धः सर्वेषामविशिष्टः यः शूद्रो धर्मार्थं सेवां कुरुते स सर्वेषामविशिष्ट एव संप०व्या० । “शूद्रदानं वा दर्शनाविरोधाभ्याम्” सू० वाशब्दः पक्षव्यावृत्तौ शूद्रस्य दानं च भवति दृश्यते हि शूद्रस्य दानं पुरुषमेधे “सपुरुषं प्राची दिग्धातुरिति” न च विरोधो गर्भदासस्य । तस्माच्छूद्रो दीयत एव अनेन च न्यायेन भूमेरप्येकदेशदानेनैव न विरोधः “परिमाणे सर्वमविशेषात्” सू० । सर्वस्वपरिमाणे यस्य यावत् स्वं तत्सर्वं गृह्यते सर्वं वेदः सर्ववेदसमिति तेन प्रागपि सहस्रात् सर्ववेदसं भवति एवं प्राप्त आह । सर्वस्वपरिमाणे अपेक्षिते सर्वस्वं यस्य यावद्धनं गृहे सुवर्णादि तत्सर्वं देयम् कुतः अविशेषात् न च सर्वस्वं ददातीति (अस्य) वाक्यशेषः श्रुतः येन सहस्रान्न्यूनमतिरिक्तं वेति विशेष आश्रीयते । “अधिकं वा प्रकृत्यनुपपत्तात्” सू० । “अधिकं वा सहस्रात् सर्ववेदसं ग्रहीतव्यम् । प्रकृत्य हि सर्ववेदसं सहस्रेणानुपपत्तिं दर्शयति कोऽर्हति मनुष्यः सर्ववेदसं दातुं तस्मात् सहस्रं देयमिति एतच्च सहस्रादधिक उपपद्यते नेतरथेति एवं तावदत्र (विश्वजिति) सहस्रादधिकं सर्ववेदसमित्युक्तम्” कर्कः । “सर्वस्व प्रतिनिधिर्वा” सू० “दीयते अप्रसिद्धत्वादुच्यते” कर्क० “धेन्वनडुत्सारधान्यपल्यदासमिथुनमहानसारोहणविमितशयनानि” सू० । “धेन्वादीनि दासमिथुनान्तानि प्रसिद्धानि महानसोपयोगिकं द्रव्यं ताम्रचर्व्यादि महानसशब्देनोच्यते आरोहणं च युग्यं विमितशयने प्रसिद्धे एव । धेनुः प्रसिद्धा अनडुद्बलीवर्दः सीरं हलम् धान्यं गोधूमादि पल्यं पलादिमानार्हम् । दासमिथुनं दासीदासौ महानसं ताम्रचर्व्यादिगृहोपकरणम् आरोहणं हस्त्यश्वादि विमितं गृहम् शयनं खट्वादि एतानि दद्यात्” कर्कः ।

**सर्ववेशिन्** पु० सर्वेषां वेशो धार्यत्वेनास्त्यस्य इनि । नटे हेमच० । [२सर्वलोचिते त्रि० ।

**सर्वसङ्गत** पु० सर्वं सङ्गतमुचितं यस्य । १षष्टिधान्ये शब्दच०

**सर्वसंसर्गलवण** न० सर्वसंसर्गेण जातं लवणम् । औषरके लवणे राजनि० ।

**सर्वसन्नहन** न० सर्वेषां सन्नहनं युद्धार्थं सज्जीकरणं यत्र । चतुरङ्गसैन्यसज्जीकरणेन युद्धयात्रायाम् अमरः ।

**सर्वसह** पु० सर्वं सहते अच् । १गुग्गुलौ रत्नमा० २सर्वसहिष्णौ त्रि० । [२सकलार्थसाधने त्रि० ।

**सर्वसिद्धि** पु० सर्वेषां सिद्धिरस्मात् । १श्रीफले शब्दच० ।

**सर्वस्व** न० कर्म० । सकलधने सर्ववेदसशब्दे दृश्यम् ।